This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशाय नमः॥ अथातो असुरीकल्पं व्याख्यास्यामः॥ कैलासशिखरासीनं देवदेवं
सदाशिवं॥ स्कंदः पृच्छति तत्त्व मेरहस्यं वदस्व मे तं॥१॥ वश्याकर्षणविद्वेषचालनं
स्तंभमारणं॥ त्रैलोक्यगतनारीनां निग्रहाय सुखेमता॥२॥ ब्राह्मणः क्षत्रियो वैश्यो
शूद्राश्चेतरजातयः॥ साधयंत्यासु तद्ब्रूहि कृपया परया विभो॥३॥ श्रीशिव उ॰ शृणुव
त्स महामंत्रमासुरीं विधिपूर्वकं॥ देहन्यासकरन्यासअंगन्याससमन्वितं॥४॥ रावधा
त्वा जपेद्यस्तु तस्य सिद्धिरनेकधा॥ सर्वे च वशमायांति देवगंधर्वपन्नगाः॥५॥ कार्तिकेय उ॰
देव कथय मे तात असुरीकल्पलक्षणं॥ को ऋतुः कंच नक्षत्रं को मासः को दिवासरः॥६॥
कोरेवः कश्च वर्षश्च का वेला का तिथिस्तथा॥ ध्यात्वा कथं देवतां च कारयेत्कल्पविग्रह॥७
॥ईश्वर उ॰॥ न तिथिर्न च नक्षत्रं न मासो नैव वासरः॥ न योगो न ऋतुर्वेला न ध्याने विधि
रेव च॥८॥ न दिवा न च रात्रिश्च नो वर्षं नैव पक्षकः॥ हंतुकामस्य शत्रूणां को धरवात्र
कारणं॥९॥ अथ राजवशीकरणं॥ असुरीसूक्ष्मचूर्णेन प्रतिमां कारयेद्बुधः॥ अर्ककाष्टेन
प्रज्वाल्याथ तदग्नौ कर्म माचरेत्॥१०॥ दक्षिणपादमारभ्य शस्त्रेणाछेदयेत्ततो॥ अष्टोत
रशतं संख्याघृताक्तां जुहुयाद्द्विजः॥ अग्नौ होमं प्रकृत्वा तु पश्चाज्ज्याप्यं तु कारयेत्॥

Acc no. : ~~97~~ M1158.
Title :- आसुरीकल्प
subject :- Vedic ritual (Tantra)
पत्रे :- (8)

K K S U LIBRARY
RAMTEK
441 106
M-1158
Dist Nagpur

Checked 2012

(1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंकृत्वा जपेन्मंत्रं कारयेत्सप्तवासरं ॥ एकभुक्तं व्रतं कुर्यात्सुविभ्रत्वासमाहितः ॥ सप्ता
हाद्वशमायाति राजानः सकलाजनेनाः ॥ असुरीप्रतिमां कृत्वा तदनु प्रजां समाचरेव
पाद्दोनतैलेन मद्भिः प्रतिमामेव कारयेत् ॥ मस्तके हृदये पुत्थेललोटपाणिपादयोः ॥ येषु
स्थानेहतेशस्त्रेहुत्वा सर्षपसमन्विते ॥ सप्ताहाद्वशमायाति राजानो राजपुत्रकाः ॥ शेव
कावशमायाति पंचशतारानयोषितः ॥ असुरीप्रतिमां कृत्वा अक्रम्य वामपादयोः ॥ पूर्वो
केन विधानेन जुहुयाद्धृतसंयुतं ॥ अष्टोत्तरशतसंख्याजपं नित्यं तु कारयेत् ॥ मासमे
कंदिनेः पंचवश्यमायाति कामिनी ॥ अथ मूलमंत्रः ॥ ॐ ह्रीं कटुके कटुकपत्रे सुभगे अ
सुरीरक्तवाससे अथर्वणस्य दुहिते अघोरे अघोरकर्मकारके अमुकस्य गतिं दह २ उप
विशाय भगं दह २ सुप्तायमनो दह २ प्रबुद्धाय हृदयं दह २ हन २ पच २ मथ २ अथतावद्
हवद्दहयावन्मेवशमागच्छति हुं फट् स्वाहा ॥ अस्य अंगिरा ऋषिः विराट् छंदः । असुरी १
देवता ॐ बीजं स्वाहा शक्तिः ॥ अभीष्टसिध्यर्थं जपे विनियोगः ॥ इति ऋष्यादिन्यासः ॥ अ
थध्यानं ॥ शरच्चंद्रकांतिकराभीतिशूलांम्रगाहस्तपद्मे दधानां भुजस्थां ॥ विभ्र
त्यंबराट्या हियज्ञोपवीता सुदाथर्वपुत्री करोत्वासुरी नः ॥ इति ध्यात्वा अथ न्यासः

कटुके कटुकपत्रे हुं फट् स्वाहा हृदयाय नमः ॥ सुभगे हुं फट् स्वाहा । शिरसे स्वाहा ॥ असुरी
रक्तवाससे हुं फट् स्वाहा । शिखायै वषट् ॥ अथर्वणस्य दुहिते हुं फट् स्वाहा । कवचाय हुं ॥ अ
घोरे अघोरकर्मकारके हुं फट् स्वाहा । नेत्रत्रयाय वौषट् हुं फट् स्वाहा । अस्त्राय फट् । इति दे
न्यासः ॥ करन्यासं कृत्वा ॥ पुत्रार्थे बाधनार्थे वा दारार्थे प्रियमिच्छतां ॥ ततः कुंडप्रकर्तव्यं
चतुष्कोणं समुसमुत्कलं ॥ स्थंडिले वह्नवनं कुर्याद्वा सर्यासहपायसैः ॥ स्रक्करीमुद्रा
यायुक्तं अंगुत्यासहमीलितं ॥ वरपार्थीवतुलं कुंडं सु ॥ मुद्रासमन्वितं ॥ पूर्वोक्तेन वि
धानेन होमं कुर्याद्दिशिच्छले ॥ चतुरस्त्रं भवेत्कुंडं त्रिकोणं न विधीयते ॥ मुद्रया गजहस्तस
दृशमारणे हननेः ॥ एतेन त्रिविधं कुंडं मुद्रया च समन्वितं ॥ विकर्मरोलुशिखांवषट्कृतिस्सम
न्वितां ॥ अर्कीपत्रोपरिस्थाप्य महामायां तथासुरीं ॥ अंगुष्ठपर्वमात्रेण ॥ मूलमंत्रेण प्र
तिष्ठिते ॥ मूलमंत्रेण असुरी आगच्छ ॥ सुप्रतिष्ठिता वरदा भव तु ॥ अथ ध्यानं ॥ रक्तव
स्त्रपरीधानां रक्तालंकारभूषितां ॥ रक्तपुष्पैर्घ्यं संप्रज्यां रक्तचंदनभूषितां ॥ ततः परं
दिवसान् असुरीजपमाचरेत् । ततो विसर्जयेद्देवीं असुरीलदनंतरं ॥ उत्तमे शिखरे जा
ता भूम्यां पर्वतवासिनी ॥ ब्रह्मयोनि समुत्पन्ना गच्छ गच्छ यथासुखं ॥ पश्चात्तां वाहिनीम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्ये सुतीर्थे निर्मले ॥ तन्मध्ये निक्षिपेन्मूर्तिं अथवा तुलसीजले ॥ कृष्णपक्षे तथाष्टम्यां आ
रंभं कारयेद्बुधः ॥ सर्वकार्यं तु संपूर्णं चतुर्दश्यां तु वर्जयेत् ॥ एवं विधां तु तां ध्यात्वा सर्व
कामार्थसाधिनीं ॥ होमांते च जपांते च कुमारीद्वयभोजनं ॥ आरंभे साधयेत्सर्वार्थो विधि
वत्फलदायकान् ॥ असुरीप्रियनामेति तत्पश्चाधानं समाचरेत् ॥ नमोस्तु आसुरीदेवी
रक्तमाल्यानुलेपने ॥ सिंहासने चतुर्बाहुश्वेता[illegible]नाआयुधधारिणि ॥ शरणागतदीना
र्तपरित्राणपरायणे ॥ शरणेप्सुंवके त्वांबे असुरीत्वां नमोस्तुते ॥ ब्रह्मविष्णुशिवादि
भ्य त्राहि त्रैलोक्यमंबिके ॥ इति ध्यात्वा ॥ अथ आलेपनवस्तुं ॥ पूर्ववत्प्रतिमां कृत्वा वि
धानं पूर्वमाचरेत् ॥ पालाशकाष्ठवन्हौ च गोघृतैर्होमं समाचरेत् ॥ ब्रह्मवृक्षसमिद्भिस्तु
जुहुयाद्घृतसंयुतं ॥ पूर्वोक्तहोममानेन जपहोमं तु कारयेत् ॥ पालाशपुष्पहोमेन अ
सुरीपायसासह ॥ सप्ताहाद्दशमायाति ब्राह्मणं येद्वपारगाः ॥ अथ क्षत्रियवश्यं २
विधिना पूर्ववद्धोमं सोत्तरं स्नातं रणं ॥ असुरीगुडमिश्रां च जुहुयात्सुरभीघृतैः
अश्वत्थकाष्ठसमिधो मूलमंत्रेण कारयेत् ॥ द्वादशाहात्सर्वमध्ये क्षत्रियं वशमानये
त् ॥ अथ वैश्यवश्यं ॥ दिनत्रयं कृते जाप्ये शतसप्तकअष्टकं ॥ कृष्णपक्षचतुर्दश्यां म

ध्यरात्रापरात्रिके ॥ एवं दिनत्रयं कृत्वा घृतेनो कामासुरीं कुनेत् ॥ अष्टोत्तरशतं संख्या त्रि
काले च पमाचरेत् ॥ दिनत्रये कृते हुत्वा जपं लक्षद्वयं चरेत् ॥ सप्तमे दिवसे प्राप्ते वैश्यो वश्य
मवाप्नुयात् ॥ शूद्रवशीकर्तुकामः ॥ असुरीगोघृतक्षीरयुक्तां तु होमयेत् ॥ अष्टोत्तर
शतं होमं सप्ताहाच्छूद्रमानयेत् ॥ अथ शत्रुघातनं ॥ निंबकाष्ठाग्निप्रज्वाल्य निंबस
मिधात्रये ॥ असुरी तैलकटुना हुत्वा पूर्वविधानतः ॥ अष्टोत्तरशतसंख्या नित्यजापम
तं स्मृतं ॥ सप्ताहे रिपुजालस्य निधानं भवति ध्रुवं ॥ द्वितीयं प्रयोगः ॥ अर्कतुअग्निं प्रज्वा
ल्य यामे कृष्णाष्टमीदिने ॥ असुरीमर्कदुग्धेन अर्कसमिधां तु होमयेत् ॥ एवं विधिकृते
सर्वजपहोमदिनाष्टकं ॥ तद्रिपुक्षयमायाति सर्पादिपजशालये ॥ अथ चक्षुस्फो
टनं ॥ अर्ककाष्ठेनाग्निं प्रज्वाल्य असुरीअर्कपायसे ॥ अष्टोत्तरशतसंख्या वैरीने
३ त्रविनाशनं ॥ अथ शालि ॥ गोघृतेनासुरीं हुत्वा चरेत् हुत्वा हुताशने ॥ सप्ताहात्पश्च
मायाति नेत्रनिर्मलं नंभयेत् ॥ अथ अपस्मारोत्पादनं ॥ अश्वगंधसरोमाणिश्वान
रोमसमन्वितं ॥ येकं कृत्वा तत्र मंपयन्नामोच्चारयेद्धुतं ॥ मंत्रपाठं सप्तदिनं कृत्वा हो
मदिनाष्टकं अपस्मारो भवेत्तस्य ज्वरश्च विविधास्तथा ॥ पादमूलं च विषमं अनेक
रोगसंभवं ॥ अथ शांतिं ॥ असुरीविधिवल्लीहं कपिलापायसेन च ॥ होमं कुर्यान्महा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवीमर्चयेशांतिप्रदंबुधा॥ अथसप्तस्वरणाभः॥ असुरीलवणंभिश्रांकृत्वासप्तदिना
निच॥ पूर्वोक्तेनविधानेनसप्तधःस्वरेणपीडयेत्॥ असुरीगोदुग्धेनकृत्वावांति
मवाप्नुयात्॥ अथउन्मत्तीकरणं॥ असुरीचचिताभस्मभजमांससमन्वितं॥
मतनिर्माल्यसंयुक्तंचूर्णमेकत्रकारयेत्॥ पुच्चंतेरिपवस्त्रस्यविलोकोभवतिध्रु
वं॥ असुरीनिंबपत्रैश्चकटुतैलेनहोमयेत्॥ यंन्नामोच्चारयेन्मंत्रीसविस्फो
टैश्चपीड्यते॥ पूर्वोक्तेनविधानेनआसुरीपायसेनच॥ विधिनाहोममात्रेणास्व
स्थोभवतिनान्यथा॥ तगरंपुष्करंहोमंआसुरिपुष्पमेवच॥ तसमाभुरमा
सीचसूक्ष्मचूर्णंतुकारयेत्॥ अष्टोत्तरशतंसंरभातस्मात्॥ यस्यशातिस[illegible]
सुसवश्यानुचरोभवेत्॥ उशीरंतगरंकुष्ठमुस्तासिध्यर्थमेवच॥ असुरीपत्रवा
पुष्पंसूक्ष्मचूर्णाभिमंत्रयेत्॥ अष्टाविंशतिसंख्याकं यस्यशातिसवशमानयेत्
असुरीपत्राणिपुष्पाणिचफलानिच॥ नागेन्द्रमदसंयुक्तं सूक्ष्मचूर्णंतुकारयेत्॥
अष्टोत्तरशतंकृत्वामूलमंत्रेणमंत्रवित्॥ पूर्ववद्विधिनाकुर्यायस्यनेत्रस्यवश्य २
ता॥ मनःशिलाप्रियंगुश्चतगरंनागकेसरं॥ पंचांगमासुरीचूर्णंअष्टोत्तराभिमं
त्रितंयन्नामोच्चारितस्पृष्टोभवतिवश्यता॥ असुरीपुष्पपत्राणिसोवीरंनागके

सरं॥ सोवीरांजनसंयुक्तंसर्वमेकत्रकारयेत्॥ मूलमंत्रेणाभिमंत्र्यअष्टोत्तरशतेनच॥ तं
चूर्णमंजनंकृत्वाअंजनेचविधीयते॥ यांयांपश्यतिचक्षुर्भ्यांतेलभतेवश्यतां॥
पंचांगमासुरीधूपंआत्मानंधूपयेद्बुधः॥ कृत्वातद्धूममात्रेणदेवादीनांचवश्य
ता॥ अष्टोत्तरशतंसंख्यात्रिकालंसाधकोजपेत्॥ विधानेदधिहोमेनदधिसिद्धि
र्थमासुरीसूकरीमांससंयुक्ताहोमंकुर्यात्दिनत्रयं॥ सर्वेतेवशमायांतिराजानोराज
सेवकाः॥ असुरीकाष्टसमिधाभिःशतंअष्टोत्तरंबुधः॥ सर्पपूतानसर्वंचगुरूमंत्र
णाहोमयेत्॥ सप्ताहंकारयेद्धोमंलभतेसुमहानिधिं॥ असुरीसर्पीयायुक्तामधु
दधिसमन्विता॥ कृत्वाचविधिनोक्तेनपुनर्जीवंतुकारयेत्॥ जपेतदेवासहस्रंद
शांशंतर्पणंहुतं॥ शतायुर्लभतेपुत्रंआसुर्यास्तुप्रसादतः॥ दशलक्षंजपेद्दशांशं
तर्पणंहुतं॥ विधिवदासुरींध्यात्वाराज्यार्थीराज्यमाप्नुयात्॥ पंचलक्षंजपन्मंत्रंद
शांशंहवनंकृतं॥ अहुतोदशसाहस्रंजुहुयाद्घृतसर्पिषा॥ असुरीमधुसंयुक्तांदधि
सर्पिसशर्करा॥ लक्षमात्रंतयोर्दद्यात्दिक्षुखंडसमन्विताः॥ हिरण्यगजवाजादिं[illegible]
राज्येहिलभ्यते॥ गृहीत्वाअसुरीपुष्पंतोयमध्येप्रवेशयेत्॥ श्रीसूर्याभिमुखोभूत्वा
अर्घ्यदिशासहस्रकं॥ विधिनामूलमंत्रेणपल्लवैःसहमिश्रितैः॥ अष्टोत्तराभिमं

९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रस्य पल्लवे श्च (र्णमंत्रयेत्॥ स्वर्णं च कलशे कृत्वा॥ आत्मानं स्नापयेत्सुधी॥ तं कुंभ
विधिनाहृत्य दाग्निग्रं नाशयेश्च वं॥ मूलमंत्रेण तां वृक्षां आदित्ये ज्वरनाशनं॥ स
हस्राहूतिनो राज्यं चातुर्थिकविनाशनं॥ असुरीपत्रपुष्पाणि मधुसर्पिःसम
न्वितं॥ जपहोमे कृते देवी दुष्टग्रहविमोचनं॥ अश्वत्थे वा नदीतीरे श्मशाने वा
शिवालये॥ अथ रंभ अरण्ये वा गवां गोष्ठे गृहे पि वा येषु स्थाने जपेद्देवीं
असुरीं निरुपद्रवे कृत्वा च पंचवर्षं कल्पादेः ऐश्वस्मतां च कामिना॥ मूलमंत्रे
ण असुरी देवी अगच्छ २ जय परमेश्वरी क्षमस्व २ ॐ असुरीकु फट् स्वाहा॥
इति मंकल्पमंत्रः॥ इत्यासुरीकल्पसमाप्तः॥ दिन ७ गुग्गुल गुटि ४८ त्रिका
ल पूजा सर्वलोकं वशं नयति॥ काचमयं गणपतिं पूजयेत् पूर्ववत् ४
जपसहस्र ८ शतपत्रिका पुष्प १०० गुग्गुलगोली १०० मोदक ५ नैवेद्यं
कन्यालाभः कर्पूरमयं गणपतिं कृत्वा

एकं त्रपिबेद्यस्तु स सर्वाणाभिमंत्रितं॥ यत्र च्युतं भवेन्न न गृह्यान्न संशयः॥ षड्दिवा
रं जपेद्यस्तु विद्यास्तु तधरीमिमां॥ एकेन मंत्रवर्णेन वशं मंडलात्परमेश्वरी॥ गरलस्य
कलशाख्याणि चतुर्वेदान्न संशयः॥ पायसं जुहुयान्नित्यं महाघ्नानरशतं तथा॥ दश
शाहान्नात्र संदेहः सर्वविद्यानिधिर्भवेत्॥ शुभ्रभस्मावरधरः स्नात्वा संध्या
मुपास्य च॥ जपेत्सप्तविंशतिवारं यो विद्यामेतामनुत्तमां॥ मंडलान्तस्य वाग्गीशो भवेत्
साक्षाच्चतुर्मुखः॥ ददाति सकलां विद्यां नात्र कार्या विचारणा॥ इति श्रीत्रिपुरसि
द्धान्ते स्तनधरीहायनीये ष२विंशतिमोध्यायः॥
अस्य ब्रह्मा ऋ० जपे विनियोगः॥ ॐ ह्रीं नमो ब्रह्मणे अं० ह० धारणं मे अस्खलित निरा
करणं तर्जनी० शिर० धारयिता भूयासं मध्यमा० शिखा० क्लीं कर्णयोः श्रुतं अना०
कवच्या० ॐ मा चोद्धं कनिष्ठा० नेत्रत्र० ममामुष्य सौः करतलकर० अस्त्रा० ३
ॐ नमो ब्रह्मणे धारणं मे अस्खलित निराकरणं धारयिता भूयासं क्लीं कर्णयोः
श्रुतं मा च्योद्धं ममामुष्य ॐ सौः॥ इति मूलमंत्रः॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः॥ अस्य श्रीधारणाब्रह्मसरस्वतीमंत्रस्य ब्रह्मा ऋषिः गाय
त्रीछंदः ब्रह्मसरस्वती देवता मम विद्याधारणार्थे जपे विनियोगः॥ चतुरास्यां
चतुर्बाहुं पद्मस्थां परमेश्वरीं॥ सरस्वत्यासमाश्लिष्टं पार्श्वपरमपूरुषं॥ अ
क्षमालाभया श्लिष्टं भी कमंडलुधरं प्रभुं॥ सर्वविद्याधिपं देवं ब्रह्माणं सततं न
मः॥ ध्यात्वैवं विलिखेद्यंत्रं चतुष्कोणं समाहितः॥ षट्दलानि लिखेत्पश्चात्
चतुरस्रं समाहितः॥ चतुष्कोणस्य मध्ये तु पूजयेद्भारतीं स्वयं॥ चतुष्कोणे च
तुर्वेदान् शास्त्रषट्कं च षड्दले॥ चतुरस्रे च दिक्कोणान् पूजयेत्परमेश्वरीं॥
ब्रह्माणमेवं संपूज्य जपेदयुतमादरात्॥ दशांशं पायसं हुत्वा सिद्धो मंत्रः प्र
जायते॥ जपेच्छ्रुत्वा धरीयस्तु अष्टाविंशतिमन्वहं॥ यशवमाचरेल्लिप्तमंडल
परमेश्वरी॥ एकेनम्रवरो नैव गृहे वेदान्तसंशयः॥ सशीघ्रं सकलान् ग्रन्था
न्नात्रकार्या विचारणा॥ अशक्तो न स्नात नित्यं यस्तु विद्यामिमां जपेत्॥ तथैव स
र्वशास्त्राणि गृहे वेदमिमं प्रिये॥ न विस्मरति देवेशि वेदशास्त्राणि सर्वदा॥ उ

स्थापकं कुर्यात्॥ प्राणप्रतिष्ठां कृत्वा अथ ध्यानं॥ आसुरीं रक्तवासां हि सर्वा
भरणभूषितां॥ सर्वायुधसमायुक्तां शत्रूणां भयकारिणीं॥१॥ अथ प्रयोगम
न्त्रः॥ ॐ ऐं ह्रीं श्रीं कटुके कटुकपत्रे सुभगे असुरि रक्तवाससे अथर्वणस्य दुहिते
अघोरे अघोरकर्मकारके अमुकस्य गतिं दह २ उपविष्टस्य भगं दह २ सुप्तस्य मनो
दह २ प्रबुद्धस्य हृदयं दह २ हन २ दह २ पच २ तावद्दह तावत्पच यावन्मे वशमानय २
हुं फट् स्वाहा॥ अथातो आसुरीकल्पं व्याख्यास्यामः॥ न तिथिर्न च नक्षत्रं नोपवा
सो विधीयते॥ इति कार्याणि साधनानस्य साधने॥ आसुर्या सुपाणायां कृ
त्वा प्राणप्रतिष्ठां कृत्वा तस्य प्रतिमायां दक्षिणपादारभ्य शस्त्रेण छिंद्यात्॥ अ
र्कसमिधेन अग्निं प्रज्वाल्य तु कटुकैसेन घृतालं दक्षिणां गुरवे जुहुयात् सप्ताहाद्व
श्या भवति॥ अथ शांतिवश्य असुरीपिष्टया प्रकृतिं कृत्वा यामपादारभ्य घृताक्तं छि
त्वा अष्टोत्तरशतेन जुहुयात्॥ सप्ताहाद्वश्यं भवति॥ अथ आसुरीवश्यप्रकरणं॥ पा
लाशसमिधा अग्निं प्रज्वाल्य असुरीं घृताक्तं अष्टोत्तरशतेन जुहुयात्॥ अक्षत्रियारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॐ अस्य श्रीअसुरीमंत्रस्य दुर्वासदेवऋषिः आस
ऋषिः जगतिछंदः असुरीदेवता मम अमुकवस्यार्थे जपेविनियोगः॥
अथषडंगन्यासः ॐ कटुकेकुटुकपत्रे हुं फट् स्वाहा अंगुष्ठाभ्यांनमः
हृद० ॐ सुभगे हुं फट् स्वाहा तर्ज० शिरसेस्वाहा ॐ असुरीरक्तवा
ससे अथर्वणस्य दुहिते मध्य० शिखायै वषट् ॐ अघोरे अघोर
कर्मकारके हुं फट् स्वा० अना० कवचाय हुं ॐ अमुकस्य गतिं दह २
उपविष्टस्य भगं दह २ सुप्तस्य मनो दह २ प्रबुद्धस्य हृदयं दह २ हन
हन पच २ कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट् तावद्देह तावत्प्रदह कु
र्यम स्वकार्य तावन्मे वशमानय २ मणिबद्धचरणं तमस्तके प्रा
र्थितस्य अमुकस्य दह २ स्वाहा करतल० अस्त्राय फट् सर्वमंत्रेण

खदिरसमिधा अग्निं प्रज्वाल्य येन असुरीगुडीकां जुहुयात् समाहाहूस्य भवति॥ अ
थश्रूद्रस्य स्युं॥ असुरीक्षीराकं जुहुयात्। तथा लवणेन जुहुयात्। सर्वत्र अष्टोत्तरशतं
अङ्गुलिं हुनेत्र श्रूद्रस्य त्रिसंध्याकाले होमं कृत्वा॥ शत्रुघातनिमित्तं निंबकाष्टेना
ग्नी प्रज्वाल्य आसुरीकटुतैलाक्तं जुहुयात्॥ समाहाम्रीयते रिपुः॥ मत्स्योत्सायने अ
सुरीहलोकं जुहुयाद् स्वस्थो भवति॥ अर्कसमिधा अग्निं प्रज्वाल्य असुरी अर्कक्षी
राकं जुहुयाद् यस्य नाम्ना अग्निं जुहोति तस्य स्फोटो भवति॥ पर्यायेन क्षीराकं जुहुया
त्स्य स्वस्थो भवति॥ अथ रवररोमाणि असुरी कल्वायन नाम्ना जुहुयात् तस्य अकस्मा
द्पस्मारो भवति॥ तस्य पर्यायेण असुरी सीराकं जुयात् स्वस्थो भवति॥ असुरी ल
वणाक्तं जुहुयात् यस्य नाम्ना सज्वरितो भवति असुरी क्षराक्तां जुहुयात् स्वस्थो भव
ति॥ एवं त्रिलोपमंत्रविधिः॥ असुरी चिता भस्म शिवनिर्माल्यमधुधत्तूरश्चार्कशा मिश्रि
तं कृत्वा अष्टोत्तरशतवारं अभिमंत्र्य स्तनेन कनिकेन यस्य क्षिपति स उन्मत्तो भवति
तस्य पर्यायेन असुरी अजाक्षीराकं अजाक्षीराक्तं जुहुयात् स्वस्थो भवति॥ ॥नगर
कोष्ठजे नामा सी असुरीपुष्प समभागे चूर्णं कृत्वा अष्टवारमभिमंत्रितेन यस्य स्पृ
शति एष तो नुच्चरो भवति॥ आसुरीनिंबपत्रैः सह यस्य नाम्ना जुहुयात् तस्य सर्वस्फो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्तं गृह्यते नस्यपर्यायेन असुरीघृतो कं जुहुयात् स्वस्थो भवति ॥ उशीरं तगरं कुष्ठं
सुश्वासिः प्रियंगु मेवच असुरीपुष्प वा पत्रं सूक्ष्म चूर्णं तु कारयेत् ॥ अष्टशताभिमं
त्रेणायस्य शांतिसवश्याभवति ॥ असुरीमूलपत्राणि पुष्पाणि च फलानि च ॥
नागेंद्रमदसंयुक्तं सूक्ष्मचूर्णं तु कारयेत् ॥ अष्टशताभिमंत्रेणायस्य शांतिस
वस्योभवति ॥ मनशीला प्रियंगु च तगर नागकेसरं ॥ असुरीपुष्पसंयुक्तं सू
क्ष्मचूर्णं तु कारयेत् अष्टशताभिमंत्रितं यस्य शांतिसदृष्टुवशो भवति ॥
असुरीपुष्पसकाशो विरागन्नागकेसरं ॥ एतानि सूक्ष्मचूर्णानि कृत्वा मंत्राभि
मंत्रितः अष्टशताभिमंत्रेण कृत्वा अंजनं च चक्षुषि ॥ अंजयित्वा यं निरीक्षं ते सव
श्यो भवति क्षणात् ॥ वाराणसुरीधूपेनात्मा धूपयित्वा ॥ योगं धगंध्यालिसव २
श्यो भवति ॥ असुरीसमिधाम् भुघृतोक्ता जुहुयात् समता निधिं लभते ॥ पुत्रा
र्थी शिवं कृत्वा दधिमधुघृताक्तं जुहुया तदशं सहस्राणि जातायुर्भवति पुत्रं ॥ राज्या
र्थी दधिमधुघृताक्तं लक्षं जुहुयात् स राज्यं लभते सुवर्णार्थी असुरीपुष्प दश
सहस्राणि जुहुयात् ॥ सहस्रं लभते हेमं त्रीकरस्य प्रसादतः ॥ पयोभक्षो असुरी
ह्रदके प्रक्षिप्य आदित्याभिमुखो भूत्वा दशसहस्र जपं कुर्यात् सुवर्ण सहस्रं ल

भते असुरीसपत्रैर्वचरसजाताभिमंत्रितं सुवर्णकलशेनस्नात्वा आत्मानं धूपये
न्नतः ॥ पल्लवेमार्जयेत तस्य लक्ष्मीर्भवति विनायकैः ॥ उपसर्गात्समुत्पन्ने दुर्भगा सुभगा
भवेत् ॥ सद्यः क्षिप्रं मुच्यते ॥ असुरी असुरी अष्टशतवारान् ॥ चातुर्थिकाधि कृत्य
शाभिभूतानां अष्टशताभिमंत्रितो येन मार्जयेत् ॥ चातुर्थिकज्वरादो असुरी अष्ट
शतवारान्मार्ज्य अष्टोत्तरशताभिमंत्रितं अस्य शिरसि क्षिपेत् ॥ सर्वहाग्रहगृ
हीतो मुच्यते ॥ अथ प्रतिमाप्रयोगः ॥ सुवर्णगंधयानीकसहस्रकस्य अश्वतो
सप्तमासानां आचार्या पूनकेशोपयमुत्कोटयात् ॥ उपरिजपंतो मुच्यते दुष्ट
ग्रहगृहीतानां असुरी होमयेत् ततः अरोग्यं क्षिप्रं भवति ॥ इति अथर्ववेदे
असुरीकल्पसमाप्तं ॥ ५

KKSU LIBRARY
RAMTEK
441 106
M-1158
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 15:08
,TRANSFERRED=2020/10/22 at 15:10:54
,PAGES=8
,TYPE=STD
,NAME=S0004407
,Book Name=M-1158-AASURIKAL
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection